दिनाङ्क :- 16.02.2026 प्रात: - 06:55

## अथ वार्ताः

### इण्डिया-एआई समिट

इण्डिया एआई समिट विंशति-षड्विंशति इति शिखरसम्मेलनम् अद्य नवदिल्ल्याः भारतमण्डपम इत्यत्र प्रारप्स्यते। पञ्चदिवसीय-शिखर -सम्मेलनमिदं ग्लोबल-साउथ इत्यत्र आयोजयिष्यमाणं प्रथमं वैश्विक-एआई -सम्मेलनम् अस्ति। अस्मिन् कार्यक्रमे विंशति-देशानां नेतारः भागं ग्रहीष्यन्ति। अस्मिन् फ्रान्स-ब्राजील-स्पेन-स्विट्जरलैण्ड-श्रीलङ्का-देशानां राष्ट्रपतयः सम्मिलिताः भविष्यन्ति। सहैव मॉरीशस-देशस्य प्रधानमन्त्री डॉ. नवीनचन्द्र-रामगुलामः तथा भूटानस्य प्रधानमन्त्री शेरिङ्ग-तोबगे सम्मिलितौ भविष्यतः। शिखरसम्मेलने पञ्चचत्वारिंशदधिक-देशानां मन्त्रिस्तरीय-प्रतिनिधिमण्डलानि भागं ग्रहीष्यन्ति। अस्माकं वार्ताहरः संसूचितवान् अत् संयुक्तराष्ट्र-महासचिवः अथ नैकासां-अन्ताराष्ट्रीय-सङ्घटनानां वरिष्ठाधिकारिणः अपि चर्चायै सम्मिलिताः भविष्यन्ति।

### प्रधानमन्त्री-एआई एक्सपो 2026

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां षड्विंशत्यधिक-सहस्रतमवर्षस्य इण्डिया-एआई-इम्पैक्ट-एक्सपो इत्येतस्य उद्घाटनं करिष्यति। पञ्चदिवसीय-एक्सपो इति प्रदर्शनीसम्बद्ध-कार्यक्रमः इण्डिया-एआई-इम्पैक्ट-समिट विंशतिः-षड्विंशतिः इत्येतेन शिखरसम्मेलनेन सह आयोजयिष्यते, यत् एआई इत्येतस्य राष्ट्रियप्रदर्शनरूपेण कार्यं करिष्यति। अस्मिन् आस्ट्रेलिया- जापान-रूस- ब्रिटेन- फ़्रान्स- जर्मनी-इटली-नीदरलैंड्स् –स्विट्ज़लैंड- सर्बिया –एस्टोनिया – ताजिकिस्तान् - अफ़्रीका इत्येतान् देशान् समेत्य त्रयोदश-देशाः एआई इत्येतस्य व्यवस्थायां अन्ताराष्ट्रियसहयोगं प्रदर्शयन्ति। अस्य त्रिमुख्यविषयाः सन्ति- जनः, ग्रहः प्रगतिश्च। अस्मिन् षड्विंशत्यधिक-उच्चक्षमतायुताः नवाचाराः अपि सम्मिलिताः भविष्यन्ति।

### पीएम साक्षात्कार-पीटीआई

प्रधानमन्त्रिणा नरेन्द्रमोदिना आगामिदशकाय तिस्रः प्राथमिकताः सूचीबद्धाः कृताः- अधिक-संरचनात्मक-परिष्कारः, नवान्वेषणस्य गहनता सरलं शासनं च। एकस्मिन् साक्षात्कारे श्रीमोदी अवदत् यत् तस्य प्रशासनस्य 'रिफार्म एक्सप्रेस' इति सामान्यनागरिकेभ्यः अतिलाभप्रदम् अस्ति। प्रधानमन्त्रिणा कथितं यत् अस्य वर्षस्य केन्द्रीय-वित्रसङ्कल्पनापत्रकं भारतस्य विकसितराष्ट्रं भवितुम् इच्छां प्रतिबिम्बयति इति।

### निर्वाचनायोगः

अद्य मुख्यनिर्वाचनयुक्तस्य ज्ञानेशकुमारस्य अध्यक्षतायां भारतस्य निर्वाचनायोगस्य सम्पूर्ण-वर्गः आगामिविधानसभानिर्वाचनेभ्यः राज्येण कृताः सज्जताः समीक्षितुं गुवाहाटीनगरस्य यात्रां करिष्यति। स्वीय त्रिदिवसीय-यात्रावधौ आयोगः राज्यस्य वरिष्ठाधिकारिभिः विभिन्नराजनैतिकदलानां प्रतिनिधिभिः च सह विस्तृतोपवेशनं करिष्यति।

### ऑस्ट्रेलिया यात्रा

स्थलसेनाध्यक्षः जनरल् उपेन्द्र-द्विवेदी अद्यारभ्य ऑस्ट्रेलियायाः चतुर्दिवसीययात्रायां भविष्यति। रक्षामन्त्रालयेन कथितं यत् अस्याः यात्रायाः उद्देश्यम् अस्ति- भारत-ऑस्ट्रेलिया-रक्षा सहयोगस्य सुदृढीकरणं अथ च द्वयोः देशयोः मध्ये वर्धमानस्य समन्वयस्य सुदृढीकरणं च। सेनाप्रमुखः ऑस्ट्रेलियादेशस्य रक्षाबलस्य वरिष्ठनेतृत्वेन सह व्यापकसंवादं करिष्यति।

## क्रिकेट

आई.सीसी पुरुष-विंशति-प्रतिविंशति-विश्वचषक-क्रिकेट्प्रतिस्पर्धायां भारतेन ह्यः रात्रौ कोलम्बोनगरस्य आर. प्रेमदासाक्रीडाङ्गणे ग्रुप-ए इत्येतस्मिन् द्वन्दे पाकिस्तानदलं एकषष्टिअङ्कैः पराजितम्। अद्य त्रिस्पर्धाः भविष्यन्ति। प्रथमायां स्पर्धायां ग्रुप-डी इत्येतस्मिन् वर्गे प्रातः एकादशवादने दिल्ल्याः अरूणजेटलीक्रीडाङ्गणे अफगानिस्तानदलं संयुक्तारबामीरातदलं सम्मुखीकरिष्यति। तत्रैव मध्याह्ने त्रिवादने कोलकातायाः ईडनगार्डन्स् क्रीडाङ्गणे ग्रुप-सी इत्येस्मिन वर्गे इङ्ग्लैण्डदलं इटलीदलं सम्मुखीकरिष्यति। तत्रैव सायं सप्तवादने पल्लकेले-अन्ताराष्ट्रीयक्रिकेट्क्रीडाङ्गणे ऑस्ट्रेलियादलं श्रीलङ्कादलं सम्मुखकरिष्यति।

।। इति वार्ताः।।